# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा - शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – १** | |
| विषयः - अनिवार्यसंस्कृतम् | (C.F.-2.3.3. New) | गुणाः - ७० |
| दिनाङ्कः - ०४/१२/२०१८ | *ग्रन्थः कालिदासविरचितम् अभिज्ञानशाकुन्तलम्* | समयः -२.०० तः ०५.०० |

### प्रथमान्वितिः

**प्रश्नः १ अधोलिखितयोः कयोश्चिद्द्वयोः ससन्दर्भं व्याख्या कार्या ।** **( १० )**

(१) *आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।*
*बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥*

(२) *ग्रीवाभाङ्गाऽभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः ।*
*पश्चार्द्धेना प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ॥*
शष्पैरर्द्धाबलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा ।
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

(३) *न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् मृदुनि मृगशरीरे तूलराशाविवाग्निः ।*
*क्व बत हरिणकानां जीवितं चातिलोलं क्व च निशितनिपाता वज्रसाराः शरास्ते ॥*

**प्रश्नः २ निम्नलिखितयोः एकस्य सविस्तरमुत्तरं लेख्यम् ।** **( १० )**

(१) *महाकविकालिदासस्य जीवनपरिचयः देयः ।*

(२) *कालिदासस्य कृतयः इति विषये निरूपणम् कुरुत ।*

### द्वितीयान्वितिः

**प्रश्नः ३ अधोलिखितयोः कयोश्चिद्द्वयोः ससन्दर्भं व्याख्या कार्या ।** **( १० )**

(१) *अनवरतधनुर्ज्यास्फालनक्रूरवर्ष्मा रविकिरणसहिष्णुः स्वेदलेशैरभिन्नः ।*
*अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरचर इव नागः प्राणसारं बिभर्ति ॥*

(२) *शमप्रधानेषु तपोवनेषु गूढं हि दाहात्मकमस्ति तेजः ।*
*स्पर्शानुकूला इव सूर्यकान्तास्ते ह्यन्यतेजोऽभिभवाद्दहन्ति ॥*

(३) *दर्भाङ्कुरेण चरणः क्षतः इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा ।*
*आसीद् विवृत्तवदना च विमोचयन्ती शाखासु बल्कलमसक्तमपि द्रुमाणाम् ॥*

**प्रश्नः ४ अधोलिखितयोः एकस्य सविस्तरमुत्तरं लेख्यम् ।** **( १० )**

(१) *अभिज्ञानशाकुन्तलस्य रसदर्शनं कुर्वन्तु ।*

(२) *द्वितीयाङ्कस्य सारांशः लेख्यः ।*

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत ।** **( १० )**

*(१) तव कुसुमशरत्वं शीतरश्मित्वमिन्दोर्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।*
*विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैस्त्वमपि कुसुमबाणान्वज्रसारीकेरोषि॥*

*(२) तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव।*
*ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः॥*

*(३) विचिन्तयन्ती यमनन्यमानसा तपोनिधिं वेत्सि न मामुपस्थितम्।*
*स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥*

**प्रश्नः ६ अधोलिखितयोः एकस्य सविस्तरमुत्तरं लेख्यम् ।** **( १० )**

*(१) अभिज्ञानशाकुन्तलस्य दुष्यन्तस्य पात्रपरिचयः कार्यताम्।*

*(२) शकुन्तलायाः चरित्रचित्रणं कुरुत।*

## चतुर्थान्वितिः

**प्रश्नः ७ दशप्रश्नानां एकैकवाक्येन उत्तराणि लिखत ।** **( १० )**

*(१) अभिज्ञानशाकुन्तलस्य रचयिता कः?*

*(२) पुराकवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितः कः?*

*(३) अद्यापि कथमनामिका सार्थवती बभूव ?*

*(४) कालिदासस्य का प्रसिद्धा ?*

*(५) अभिज्ञानशाकुन्तले कः नायकः ?*

*(६) अभिज्ञानशाकुन्तले कोऽङ्गी रसः ?*

*(७) दुष्यन्तः कीदृशः नायकः?*

*(८) अभिज्ञानशाकुन्तलस्य नायिका का ?*

*(९) काव्येषु किं रम्यम् ?*

*(१०) नाटकेषु किं रम्यम् ?*

*(११) अभिज्ञानशाकुन्तलं रूपकस्य कः भेद ?*

*(१२) अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?*

*(१३) स्रष्टुः आद्या सृष्टिः का ?*

*(१४) विधिहुतं हविः कः वहति ?*

*(१५) कया प्राणिनः प्राणवन्तः ?*

--oo--